# श्रीराधासुधानिधि

यस्याः कदापि वसनांचल खेलनेनोत्थ
धन्यातिधन्य पवनेन कृतार्थमानी।
योगीन्द्रदुर्गमगति र्मधुसूदनोऽपि
तस्या नमोस्तु वृषभानुभुवो दिशेऽपि।।१।।

ब्रह्मेश्वरादि सुदुरूह पदारविन्द-
श्रीमत्पराग परमाद्भुत वैभवायाः
सर्वार्थसार रसवर्षिकृपार्द्रदृष्टे-
स्तस्या नमोस्तु वृषभानुभुवो महिम्ने।।२।।

यो ब्रह्मरुद्रशुकनारदभीष्ममुख्यै-
रालक्षितो न सहसा पुरुषस्य तस्य।
सद्योवशीकरणचूर्णमनन्तशक्तिं
तं राधिचिरणरेणुमनुस्मरामि।।३।।

आधाय मूर्धनि यदापुरुदारगोप्यः
काम्यं पदं प्रियगुणैरपि पिच्छमौलेः।
भावोत्सवेन भजतां रसकामधेनुं
तं राधिका चरणरेणुमहं स्मरामि।।४।।

दिव्यप्रमोदरंससारनिजांगसंग
पीयूषवीचिनिचयैरभिषेचयन्ती।
कन्दर्प कोटि शरमूर्च्छित नन्दसूनु-
संजीवनी जयति कापि निकुंजदेवी।।५।।

तन्नः प्रतिक्षण चमत्कृत चारुलीला-
लावण्य मोहनमहा मधुरांगभगि।
राधाननं हि मधुरांग कलानिधान-
माविर्भविष्यति कदा रससिन्धुसारम्।।६।।

यत्किंकरीषु बहुशः खलु काकुवाणी
नित्यं परस्य पुरुषस्य शिखण्डमौलेः।
तस्याः कदा रसनिधेर्वृषभानुजाया-
स्तत्केलिकुंज भवनांगणमार्जनी स्याम्।।७।।

वृन्दानि सर्वमहतामपहाय दूराद्-
वृन्दाटवीरमनुसर प्रणयेन चेतः।
सत्तारणीकृत सुभाव सुधारसौघं
राधाभिधानमिह दिव्य निधानमस्ति।।८।।

केनापि नागरवरेण पदे निपत्य
संप्रार्थितैक परिरम्भरसोत्सवायाः।
सभ्रूविभंगमतिरंगनिधे कदा ते
श्रीराधिके नहिनहीति गिरः श्रृणोमि।।९।।

यत्पादपद्मनखचन्द्रमणिच्छटायाः
विस्फूर्जित किमपि गोपवधूष्वदर्शि।
पूर्णानुरागरससागरसारमूर्तिः
सा राधिका मयि कदापि कृपां करोतु।।१०।।

उज्जृम्भमाणरसवारिनिधेस्तांगै-
रङ्गैरिव प्रणयलोलविलोचनायाः।
तस्या कदा नु भविता मयि पुण्यदृष्टि-
र्वृन्दाटवीनवनिकुंजगृहाधिदेव्याः।।११।।

वृन्दावनेश्वरि तवैव पदारविन्दं
प्रेमामृतैकमकरन्दरसौघपूर्णम्।
हृद्यर्पितं मधुपतेः स्मरतापमुग्रं
निर्वापयत्परमशीतलमाश्रयामि।।१२।।

राधाकरावचितपल्लववल्लरीके
राधापदांकविलसन्मधुरस्थलीके।
राधायशोमुखरमत्तखगावलीके
राधाविहारविपिने रमतां मनो मे।।१३।।

कृष्णामृतं चल विगाढुमितीरिताहं
तावत्सहस्व रजनी सखि यावदेति।
इत्थं विहस्य वृषभानुसुतेह लप्स्ये
मानं कदा रसदकेलिकदम्बजातम् ।।१४।।

पादांगुलीनिहितदृष्टिमपत्रपिष्णुं
दूरादुदीक्ष्य रसिककेन्द्रमुखेन्दुबिम्बम्।
वीक्षे चलत्पदगतिं चरिताभिरामां
झंकारनूपुरवतीं बत कर्हि राधाम्।।१५।।

उज्जागरं रसिकनागरसगरंगैः
कुंजोदरे कृतवती नु मुदा रजन्याम्।
सुस्नापिता हि मधुनैव सुभौजिता त्वं
राधे कदा स्वपिषि मत्करलालितांघ्रिः।।१६।।

वैदग्ध्यसिन्धुरनुरागरसैकसिन्धु-
र्वात्सल्यसिन्धुरतिसान्द्रकृपैकसिन्धुः।
लावण्यसिन्धुरमृतच्छविरूपसिन्धुः
श्रीराधिका स्फुरतु मे हृदि केलि सिन्धुः।।१७।।

दृष्ट्वैव चम्पकलतेव चमत्कृतांगी
वेणुध्वनिं क्व च निशम्य च विह्वलांगी।
सा श्यामसुन्दरगुणैरनुगीयमानैः
प्रीती परिष्वजतु मां वृषभानुपुत्री।।१८।।

श्रीराधिके सुरतगिनितम्बभागे
कांचीकलापकलहंसकलानुलापैः।
मंजीरशिंजितमधुव्रत गुंजितांघ्रि.
पंकेरुहैः शिशिरय स्वरसच्छटाभिः।।१९।।

श्रीराधिके सुरतंगणि दिव्यकेलि-
कल्लोलमालिनि लसद्वदनारविन्दे।
श्यामामृताम्बुनिधिसंगमतीव्रवेगि-
न्यावर्त्तनाभिरुचिरे मम सन्निधेहि।।२०।।

सत्प्रेमसिन्धुमकरन्दरसौघधारा-
सारानजस्त्रमभितः स्त्रवदाश्रितेषु।
श्रीराधिके तव कदा चरणारविन्दं
गोविन्दजीवन धनं शिरसा वहामि।।२१।।

संकेतकुंजमनुकुंजरमन्दगामि-
न्यादाय दिव्यमृदुचन्दनगन्धमाल्य्।

त्वां कामकेलिरभसेन कदा चलन्तीं
राधेऽनुयामि पदवीमुपदर्शयन्ती।।२२।।

गत्वा कलिन्दतनयाविजनावतार.
मुद्वर्त्तयन्त्यमृतमंगमनंगजीवम्
श्रीराधिके तव कदा नवनागरेन्द्रं
पश्यामि मग्ननयनं स्थितमुच्चनीपे।।२३।।

सत्प्रेमराशिसरसो विकसत्सरोजं
स्वानन्दसीधुरससिन्धुविवर्द्धनेन्दुम्।
तच्छ्रीमुखं कुटिलकुन्तलभृगंजुष्टं
श्रीराधिके तव कदा नु विलोकयिष्ये।।२४।।

लावण्यसाररससारसुखैकसारे
कारुण्यसारमधुरच्छरूपसारे।
वैदग्ध्यसाररतिकेलिविलाससारे
राधाभिधे मम मनोखिलसारसारे ।।२५।।

चिन्तामणिः प्रणमतां व्रजनागरीणं.
चूडामणिःकुलमणिर्वृषभानुनाम्नः।
सा श्यामकामवरशान्तिमर्णिर्निकुड्.ज
भूषामणिर्हृदयसम्पुटसन्मणिर्नः।।२६।।

मंजुस्वभावमधिकल्पलतानिकुंज
व्यंजंतमद्भुतकृपारपुञ्जमेव।
प्रेमामृताम्बुधिमगाधमबाधमेनं
राधाभिधं द्रुतमुपाश्रय साधु चेतः।।२७।।

श्रीराधिकां निजविटेन सहालपन्तीं
शोणाधरप्रसृमरच्छविमंजरीकाम्।
सिन्दूरसंवलितमौक्तिकपंक्तिशोभां
यो भावयेद्दशनकुन्दवतीं स धन्यः।।२८।

पीतारुणच्छविमनन्ततडिल्लताभां
प्रौढानुरागमदविह्वलचारुमूर्तिम्।
प्रेमास्पदां व्रजमहीपतितन्महिष्यो-
गोविन्दवन्मनसि तां निदधामि राधाम्।।२९।।

निर्माय चारुमुकुटं नवचन्द्रकेण
गुञ्जाभिरारचितहारमुपाहरन्ती।
वृन्दाटवीनवनिकुञ्जगृहाधिदेव्याः
श्रीराधिके तव कदा भवितास्मि दासी।।३०।।

संकेतकुंजमनुपल्लवमास्तरीतुं
तत्तत्प्रसादमभितः खलुः संवरीतुम्।
त्वां श्यामचन्द्रमभिसारयितुं धृताशे
श्रीराधिके मयि विधेहि कृपाकटाक्षम्।।३१।।

दूरादपास्य स्वजनान्सुखमर्थ कोटिं
सर्वेषु साधनवरेषु चिरं निराशः।
वर्षन्तमेव सहजाद्भुतसौख्यधारां
श्रीराधिकाचरणरेणुमहं स्मरामि।।३२।।

वृन्दाटवीप्रकटमन्मथककोटिमूर्तेः
कस्यापिगोकुलकिशोरनिशाकरस्य।
सर्वसवसम्पुटमिव स्तनशातकुम्भ-
कुम्भद्वयं स्मर मनो वृषभानुपुत्र्याः।।३३।।

सान्द्रानुरागरससारसरःसरोजं
किं वा द्विधा मुकुलितं मुखचन्द्रभासा।।
तन्नूतनस्नयुगं वृषभानुजायाः
स्वानन्दसीधुमकरन्दघनं स्मरामि।।३४।।

क्रीडासरःकनकपङ्कजकुड्मलाय
स्वानन्दपूर्णरसककल्पतरोः फलाय।
तस्मै नमो भुवनमोहनमोहनाय
श्रीराधिके तव नवस्तनमण्डलाय।।३५।।

पत्रावलीं रचयितु कुचयोः कपोले
बद्धुंविचित्रकबरीं नवमल्लिकाभिः।

अंग च भूषयितुमाभरणैर्धृताशे
श्रीराधिके मयि विधेहि कृपावलोकम्।।३६।।

श्यामेति सुन्दरवरेति मनोहरेति
कन्दर्पकोटिललितेति सुनागरेति।
सोत्कण्ठमन्हि गृणती मुहुराकुलाक्षी
सा राधिका मयि कदा नु भवेत्प्रसन्ना।।३७।।

वेणुः करान्निपतितः स्खलितः शिखण्डं
भ्रष्टं च पीतवसनं व्रजराजसूनोः।
यस्याः कटाक्षशरपातविमूर्च्छितस्य
तां राधिकां परिचरामि कदा रसेन।।३८।।

तस्या अपाररससारविलासमूर्त्ते-
रानन्दकन्दपरमाद्भुतसौम्यलक्ष्म्याः।
ब्रह्मादिदुर्गमगतेर्वृषभानुजायाः
कैंकर्य मेव मम जन्मनि जन्मनि स्यात्।।३९।।

पूर्णानुरागरसमूर्तितडिल्लताभां
ज्योतिः परं भगवतो रतिमद्रहस्यम्।
यत्प्रादुरस्ति कृपया वृषभानुगेहे
स्यात्किंकरी भवितुमेव ममाभिलाषः।।४०।।

प्रेमोल्लसद्रसविलासविकासकन्दं
गोविन्दलोचनतृप्तचकोरपेयम्।
सिंचन्तमद्भुतसामृतचन्द्रिकौघैः
श्रीराधिकावदनचन्द्रमहं स्मरामि।।४१।।

संकेतकुन्ज्जनिलये मृदुपल्लवेन
कलृप्ते कदापि नवसंगभयत्रपाद्ध्याम्।
अत्याग्रहेण करवारिरुहे गृहीत्वा
नेष्ये विटेन्द्रशयने वृषभानुपुत्रीम्।।४२।।

सद्गन्धमाल्यनवचन्द्रलवंगसंग
तांबूलसंपुटमधीश्वरि मां वहन्तीम्।
श्यामं तमुन्मदरसादभिसंसरंती
श्रीराधिके करुणयानुचरी विधेहि।।४३।।

श्रीराधिके तव नवोद्गमचारुवृत्त-
वक्षोजमेव मुकुलद्वयलोभनीयम्।
श्रोणी दधद्रसगुणैरुपचीयमानं
कैशोरकं जयति मोहनचित्तचोरम्।।४४।।

संलापमुच्छलदनंगतरंगमाला
संक्षोभितेन वपुषा व्रजनागरेण।
प्रत्यक्षरं क्षरदपाररसामृताब्धिं
श्रीराधिके तव कदा नु श‍ृणोम्यदूरात्।।४५।।

अंकस्थितेऽपि दयिते किमपि प्रलापं
हा मोहनेति मधुरं विदधत्यकस्मात्।
श्यामानुरागमदविह्वलमोहनांगी
श्यामामणिर्जयति कापि निकुन्जसीम्नि।।४६।।

कुन्जजन्तरे किमपि जातरसोत्सवायाः
श्रुत्वा तदालपिताशिंजितमिश्रितानि।
श्रीराधिके तव रहः परिचारिकाहं
द्वारस्थिता रसह्लदे पतिता कदा स्याम्।।४७।।

वीणां करे मधुमतीं मधुरस्वरां ता-
माधाय नागरशिरोमणिभावलीलाम्
गायन्त्यहो दिनमपारमिवाश्रुवर्षै-
र्दुःखान्नयन्त्यहह सा हृदि मेऽस्तु राधा।।४८।।

अन्योन्यहाससपरिहासविलासकेलि
वैचित्र्यजृंभितमहारसवैभवेन।
वृन्दावने विलसितापहृतं विदग्ध-
द्वन्द्वेन केनचिदहो हृदयं मदीयम्।।४९।।

महाप्रेमोन्मीलन्नवरससुधासिन्धुलहरी-
परीवाहैर्विश्वं स्नपयदिव नेत्रान्तनटनैः।
तडिन्मालागौरं किमपि नवकैशोरमधुरं
पुरंध्रीणां चूडाभरणनवरत्नं विजयते।।५०।।

अमन्दप्रेमाङ्कश्लथसकलनिर्बन्धहृदयं
दयापारं दिव्यच्छविमधुरलावण्यललितं।
अलक्ष्यं राधाख्यं निखिलनिगमैरप्यतितरां
रससम्भोधेः सारं किमपि सुकुमारं विजयते।।७१।।

दुकूलं बिभ्राणामथ कुचतटे कंचुकपटं-
प्रसादं स्वामिन्याः स्वकरतलदत्तं प्रणयतः।
स्थितां नित्यं पार्श्वे विविधपरिचर्यैकचतुरां
किशोरीमात्मानं किमिह सुकुमारी तु कलये।।७२।।

विचिन्वन्ती केशान् क्वचन करजैः केचुकपटं
क्व चाप्यामुञ्चन्ती कुचकनकदीव्यत्कलशयोः।
सुगुल्फे प्यस्यन्ती क्वचन मणिमञ्जीरयुगलं
कदा स्यां श्रीराधे तव सुपरिचारिण्यहमहो।।७३।।

अतिस्नेहादुच्चैरपि च हरिनामानि गृणत-
स्तथा सौगन्धाद्यैर्बहुभिरुपचारैश्च यजतः।
परानन्दं वृन्दावनमनुचरन्तं च दधतो
मनो मे राधायाः पदमृदुलपद्मे निवसतु।।७४।।

निजप्राणेश्वर्या यदपि दयनीयेयमिति मां
मुहुश्चुम्बत्यालिङ्गति सुरतमाध्व्या मदयति।
विचित्रा स्नेहर्धिं रचयति तथाप्यद्भुतगते-
स्तवैव श्रीराधे पदरसविलासे मम मनः।।७५।।

प्रीतिं कामपि नाममात्रजनितप्रोद्दामरोद्गमाम्
राधामाधवयोः सदैव भजतोः कौमार एवोज्ज्वलाम्।
वृन्दारण्यनवप्रसूननिचयानानीय कुञ्जान्तरे
गूढं शैशवखेलनैर्बत कदा कार्यो विवाहोत्सवः।।७६।।

विपञ्चितसुपञ्चमं रुचिरवेणुना गायता
प्रियेण सह वीणया मधुरगानविधानिधिः।
करीन्द्रवनसम्मिलन्मदकरिण्युदारक्रमा
कदा नु वृषभानुजा मिलतु भानुजारोधसि।।७७।।

सहासवरमोहनाद्भुतविलासरासोत्सवे
विचित्र वरताण्डवश्रमजलार्द्र गण्डस्थलौ
कदानुवरनागरीरसिकशेखरौ तो मुदा
भजामि पदलालनाल्ललितजीवनं कुर्वती।।५६।।

वृन्दारण्यनिकुञ्जमंजुलगृहेष्वात्मेश्वरीं मार्गयन्
हा राधे सविदग्धदर्शितपथं किं यासि नेत्यालपन्।
कालिन्दीसलिले च तत्कुचतटीकस्तूरिकापंकिले
स्नायंस्नायमहो कुदेहजमलं जह्मांकदा निर्मलः।।५९।।

पादस्पर्शरसोत्सवं प्रणतिभिर्गोविन्दमिन्दीवर
श्यामं प्रार्थयितुं सुमंजुलरहःकुंजांश्च संमार्जितुम्।
मालाचन्दनगन्धपूररसवत्ताम्बूलसत्पानका-
न्यादातुं च रसैकदायिनि तव प्रेष्या कदा स्यामहम्।।६०।।

लावण्यामृतवार्त्तया जगदिदं संप्लावयमती शर-
द्राकाचन्द्रमनंतमेव वदनज्योत्स्नाभिरातन्वती।
श्रीवृन्दावनकुंजमजुगृहिणी काप्यस्ति तुच्छामहो
कुर्वाणाखिलसाध्यसाधनकथां दत्त्वा स्वदास्योत्सवम्।।६१।।

दिष्ट्या यत्र क्वचन विहिताम्रेडने नन्दसूनोः
प्रत्याख्यानच्छलत उदितोदारसंकेतदेशा।
धूर्त्तेन्द्रत्वद्भयमुपगता सा रहो नीपवाट्यां
नैकागच्छेत्कितव कृतमित्यादिशेत्कर्हि राधा।।६२।।

सा भ्रूनर्तनचातुरी निरुपमा सा चारुनेत्राञ्चले-
लीलाखेलनचातुरी वरतनोस्तादृग्वचश्चातुरी।
संकेतागमचातुरी नवनवक्रीडाकलाचातुरी
राधाया जयतात्सखीजनपरीहासोत्सवे चातुरी।।६३।।

उन्मीलन्मिथुनानुरागगरिमोदारस्फरन्माधुरी
धारासारधुरीणदिव्यललितानंगोत्सवैः खेलतोः
राधामाधवयोः परं भवतु नश्चित्ते चिरार्तिस्पृशोः
कौमारे नवकेलिशिल्पलहरीशिक्षादिदीक्षारसः।।६४।।

कदा वा खेलन्तौ व्रजनगरवीथीषु हृदयं
हरन्तौ श्रीराधाव्रजपतिकुमारौ सुकृतिनः।
अकस्मात्कौमारे प्रकटनवकैशोरविभवौ
प्रपश्यन्पूर्णः स्यां रहसि परिहासादिनिरतौ।।६५।।

धम्मिल्लं ते नवपरिमलैरुल्लसत्फुल्लमल्ली-
मालं भालस्थलमपि लसत्सांद्रसिंदूरबिन्दुम्।
दीर्घापांगच्छविमनुपमां चारुचन्द्रांशुहासं
प्रेमोल्लासं तव तु कुचयोर्द्वन्द्वमन्तः स्मरामि।।६६।।

लक्ष्मीकोटिविलक्ष्यलक्षणलसल्लीला किशोरीशतै-
र्राराध्यं व्रजमण्डलेतिमधुरं राधाभिधानं परम्।
ज्योतिः किंचन सिंचदुज्वलरसप्राग्भावमाविर्भव-
द्राधे चेतसि भूरिभाग्यविभवैः कस्याप्यहो जृम्भते।।६७।।

तज्जीयान्नवयौवनोदयमहालीलामयं
सांद्रानन्दघनानुरागघटितश्रीमूर्तिसंमोहनम्।
वृन्दारण्यनिकुञ्जकेलिललितं काश्मीरगौरच्छवि
श्रीगोविन्द इव व्रजेन्द्रगृहिणीप्रेममैकपात्रं महः।।६८।।

प्रेमानन्दरसैकवारिधिमहाकल्लोलमालाकुला
व्यालोलारुणलोचनांचलचमत्कारेण संचिन्वती।
किंचित्केलिकलामहोत्सवमहो वृन्दाटवीमन्दिरे
नन्दत्यद्भुतकामवैभवमयी राधा जगनमोहनी।।६९।।

वृन्दारणयनिकृञ्जसीमनि नवप्रेमानुभावभ्रमद्----
भ्रूभंगीलवमोहितव्रजमणिर्भक्तैकचिंतामणिः।
सांद्रानन्दरसामृतस्रवमणि प्रोद्दामविद्युल्लता-
कोटिज्योतिरुदेति कापि रमणीचूडामणिर्मोहिनी।।७०।।

लीलापांगतरगितैरुदभवन्नेकैकशः कोटिशः
कन्दर्पाः पुरुदर्पटंकृतमहाकोदण्डविस्फारिणः।
तारुण्यप्रथमप्रवेशसमये यस्या महामाधुरी
धारानंतचमत्कृता भवतु नः श्रीराधिका स्वामिनी।।७१।।

यत्पादाम्बुरुहैकरेणुकणिकां मूर्ध्ना निधातुं नहि
प्रापुर्ब्रह्मशिवादयोप्यधिकृतिं गोप्येकभावाश्रया।
सापि प्रेमसुधारसाम्बुधिनिधी राधापि साधारणी-
भूता कालगतिक्रमेण बलिना हे दैव तुभ्यं नमः।।७२।।

दूरे स्निग्धपरंपरा विजयतां दूरे सुहृन्मण्डली
भृत्याः संतु विदूरतो व्रजपतेरन्यप्रसंगः कुतः।
यत्र श्रीवृषभानुजाकृतरतिः कुञ्जोदरे कामिनां
द्वारस्था प्रियकिंकरी परमहं श्रोष्यामि कांचिध्वनिम्।।७३।।

गौरांगे म्रदिमा स्मिते मधुरिमा नेत्रांचले द्राघिमा
वक्षोजे गरिमा तथैव तनिमा मध्ये गतौ मंदिमा।
श्रोण्यां च प्रथिमा भ्रुवोः कुटिलिमा बिंबाधरे शोणिमा
श्रीराधे हृदि ते रसेन जडिमा ध्यानऽस्तु मे गोचरः।।७४।।

प्रातः पीतपटं कदा व्यपनयाम्यन्यांशुकस्यार्पणा
त्कुञ्जे विस्मृतकंचुकीमपि समानेतुं प्रधावामि वा।
बध्नीयां कबरीं युनज्मि गलितां मुक्तावलीमंजये
नेत्रे नागरि रंगकैश्च पिदधाम्यंगव्रणं वा कदा।।७५।।

यद्वृन्दावनमात्रगोचरमहो यन्न श्रुतीकं शिरो-
प्यारोढुं क्षमते न यच्छिवशुकादीनां तु यद्ध्यानगम्।
यत्प्रेमामृतमाधुरीरसमयं यन्नित्यकैशोरकं
तद्रूपं परिवेष्टुमेव नयनं लोलायमानं मम।।७६।।

धर्माद्यर्थचतुष्टयं विजयतां किं तद्वृथावार्तया
सैकांतेश्वरभक्तियोगपदवी त्वारोपिता मूर्द्धनि।
यो वृन्दावनसीम्नि कश्चन घनाश्चर्यः किशोरीमणि---
स्तत्कैंकर्यरसामृतादिह परं चित्ते न मे रोचते।।७७।।

प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं श्रृंगारलीलाकला.
वैचीत्री परमावधिर्भगवतः पूज्यैव कापीशता।
ईशानी च शची महासुखतनुः शक्तिः स्वतन्त्रा परा
श्रीवृन्दावननाथपट्टमहिषी राधैव सेव्या मम।।७८।।

राधादास्यमपास्य यः प्रयतते गोविंदसंगाशया
सोयं पूर्णसुधारुचेः परिचय राकां विना कांक्षति।
किं च श्यामप्रवाहवारिलहरीबीजं न ये तो विदु
स्ते प्राप्यापि महामृतांबुधिमहो बिन्दुं परं प्राप्नुयुः।।७९।।

कैशोराद्भुतमाधुरीभरधुरीणांगच्छविं राधिकां
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मेप्यहो निर्ममाः
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भ्यो नमः।।८०।।

लिखन्ति भुजमूलतो न खलु शंखचक्रादिकं
विचित्रहरिमन्दिरं न रचयन्ति भालस्थले।
लसत्तुलसिमालिकां दधति कण्ठपीठे न वा
गुरोर्भजनविक्रमात्क इह ते महाबुद्धयः।।८१।।

कर्माणि श्रुतिबोधितानि नितरां कुर्वन्तु कुर्वन्तु मा
गूढाश्चर्यरसाः स्रगादिविषयान्गृह्णन्तु मुञ्चन्तु वा।
कैर्वा भावरहस्यपारगमति श्रीराधिकाप्रेसयः
किञ्चिज्ज्ञैरनुयुज्यतां बहिरहो भ्राम्यद्भिरन्यैरपि।।८२।।

अलं विषयवार्त्तया नरककोटिबीभत्सया
वृथा श्रुतिकथाश्रमो बत बिभेमि कैवल्यतः
परेशभजनोन्मदा यदि शुकादयः किं ततः
परं तु मम राधिकापदरसे मनो मज्जतु।।८३।।

तत्सौन्दर्य स च नववयोयौवनश्रीप्रवेशः
सादृग्भङ्गी स च रसघनाश्चर्यवक्षोजकुम्भः।
सोयं बिम्बाधरमधुरिमा तत्स्मितं सा च वाणी
सेयं लीलागतिरपि न विस्मयति राधिकायाः।।८४।।

यल्लक्ष्मीशुकनारदादिपरमाश्चर्यानुरागोत्सवैः
प्राप्तं त्वत्कृपसैव हि व्रजभूतां तत्तत्किशोरीगणैः।
तत्कैंकर्यमनुक्षणाद्भुतरसं प्राप्तुं धृताशे मयि
श्रीराधे नवकुञ्जनागरि कृपादष्टिं कदा दास्यसि।।८५।।

लब्ध्वा दास्यं तदतिकृपया मोहनस्वादितेन
सौन्दर्यश्रीपदकमलयोर्लालनैः स्वापितायाः।
श्रीराधायाः मधुरमधुरोच्छिष्टपीयूषसारं
भोजं भोजं नवनवसानन्दमग्नः कदा स्याम्।।८६।।

यदि स्नेहाद्राधे दिशसि रतिलाम्प्यपदवीं
गतं मे स्वप्रेष्ठं तदपि मम निष्ठं श्रृणु यथा।
कटाक्षैरालोके स्मितसहचरैर्जातपुलकं
समाश्लिष्याम्युच्चैरथ च रसये त्वत्पदरसम्।।८७।।

कृष्णः पक्षो नवकुवलयं कृष्णसारस्तमालो
नीलाम्भोदस्तव रुचिपदं नामरूपैश्च कृष्णा।
कृष्णे कस्मात्तव विमुखता मोहनश्याममूर्त्ता
वित्युक्त्वा त्वां प्रहसितमुखीं किन्नु पश्यामि राधे।।८८।।

लीलापांगतरंगितैरिव दिशो नीलोत्पलश्यामलां
दोलायत्कनकाद्रिमण्डलमिव व्योमस्तनैस्तन्वतीम्।
उत्फुल्लस्थलपंकजामिव भुवं रासे पदन्यासतः
श्रीराधामनुधावतीं व्रजकिशोरीणां घटां भावये।।८९।।

दृशौ त्वयि रसाम्बुधौ मधुरमीनवद्भ्राम्यतः
स्तनौ त्वयि सुधारस्यहह चक्रवाकाविव।
मुखं सुरतरंगिणि त्वयि विकासिहेमाम्बुजं
मिलन्तु मयि राधिके तव कृपातरंगच्छटा।।९०।।

कान्ताद्याश्चर्यकान्ताकुलमणिकमलाकोटिकाम्यैकपादा
म्भोजभ्राजन्नखेन्दुच्छविलवविभवा काप्यगम्या किशोरी।
उन्मर्यादप्रवृध्दप्रणयरसमहाम्भोधिगम्भीरलीला
माधुर्योज्जृम्भितांगी मयि किमपिकृपारंगमंगी करोतु।।९१।।

कलिन्दगिरिनन्दिनीपुलिनमालतीमन्दिरे
प्रविष्टवनमालिनी ललितकेलिलोलीकृते
प्रतिक्षणचमत्कृताद्भुतरसैकलीलानिधे!
निधेहि मयि राधिके निजकृपातरंगच्छटाम्।।९२।।

यस्यास्ते बत किंकरीषु बहुशश्चाटुनि वृन्दाटवी.
कन्दर्पः कुरुते तवैव किमपि प्रेप्सुः प्रसाददोत्सवम्।
सान्द्रानन्दघनानुरागलहरीनिस्यन्दपादाम्बुज-
द्वन्द्वे श्रीवृषभानुनन्दिनि सदा वन्दे तव श्रीपदम्।।१३।।

यज्जापः सकृदेव गोकुलपतेराकर्षकस्तत्क्षणा-
द्यत्र प्रेमवतां समस्तपुरुषार्थेषु स्फुरेत्तुच्छता।
यन्नामांकितमन्त्रजापनपरः प्रीत्या स्वयं माधवः
श्रीकृष्णोऽपि तदद्भुतं स्फुरत मे राधेति वर्णद्वयम्।।१४।।

कालिन्दीतटकुञ्जमन्दिरगतो योगीन्द्रवद्यत्पद-
ज्योतिर्ध्यानपरः सदा जपति यां प्रेमाश्रुपूर्णो हरिः।
केनाप्यद्भुतमुल्लसद्रतिरसानन्देन संमोहितः
साराधेति सदा हृति स्फुरतु मे विद्या परा द्व्यक्षरा।।१४।।

देवानामथ भक्तमुक्तसुहृदामत्यन्तदूरं च यत्
प्रेमानन्दरसं महासुखकरं चोच्चारितं प्रेमतः।
प्रेम्णाकर्णयते जपत्यथ मुदा गायत्यथालिष्वयं
जल्पत्यश्रुमुखो हरिस्तदमृतं राधेति मे जीवन्।।१६।।

या वाराधयति प्रियं व्रजमणिं प्रौढ़ानुरागोत्सवैः
संसिध्यन्ति यदाश्रयेण हि परं गोविन्सख्युत्सुकाः।
यत्सिद्धि परमापदैकरसवत्याराधनान्ते नु सा
श्रीराधाश्रुतिमौलिशेखरलता नाम्नी मम प्रीयतम्।।१७।।

गात्रे कोटितडिच्छवि प्रविततानन्दच्छविए श्रीमुखे
बिम्बोष्ठे नवविद्रुमच्छवि करे सत्पल्लवैकच्छवि
हेमाम्भोरुहकुड्मलच्छवि कुचद्वन्द्वेऽरविन्देक्षणं
वन्दे तन्नवकुञ्जकेलिमधुरं राधाभिधानं महः।।१८।।

मुक्तापंकितप्रतिमदशना चारुबिम्बाधरोष्ठी
मध्ये क्षामा नवनवरसावर्त्तगम्भीरनाभि।
पीनश्रोणिस्तरुणिमसमुन्मेषलावण्यसिन्धु-
र्वैदग्धीनां किमपि हृदयं नागरी पातु राधा।।१९।।

स्निग्धाकुंचितनीलकेशि विदलद्बिम्बोष्ठि चन्द्रानने
खेलत्खञ्जनगञ्जनाक्षि रुचिमन्नासाग्रमुक्ताफले।
पीनश्रोणि तनूदरि स्तनतटीवृत्तच्छटात्यद्भुते
राधे श्रीभुजवल्लिचारुवलये स्वं रूपमाविष्कुरु।।१००।।

लज्जान्तःपटमारचय्य रचितस्मायप्रसूनाञ्जलौ
राधांगे नवरंगधाम्नि ललितप्रस्तावने यौवने।
श्रीणीहिमवरासने स्मरनृपेणाध्यासिते मोहनं
लीलापांगविचित्रताण्डवकलापाण्डित्यमुन्मीलति।।१०१।।

सा लावण्यचमत्कृतिर्नववयोरूपं च तन्मोहनं
तत्तत्केलिकलाविनासलहरीचातुर्यमाश्चर्यभूः।
नो किंचित्कृतमेव यत्र न नुतन्रागो न वा सम्भ्रमो
राधामाधवयोः स कोपि सहजः प्रेमोत्सवः पातु वः।।१०२।।

येषां प्रेक्षां वितरित नवोदागाढानुरागा-
न्मेघश्यामो मधुरमधुरानन्द मूर्त्तिर्मुकुन्दः
वृन्दाटव्यां सुमहिमचमत्कारकारीण्यहो किं
तानि प्रेक्षेद्भुतरसनिधानानि राधापदानि।।१०३।।

बलान्नीत्वा तल्पं किमपि परिरभ्याधरसुधां
निपीय प्रेल्लिख्य प्रखरनखरेण स्तनभरम्।
ततो नीवीं न्यस्ते रसिकमणिना त्वत्करधृते
कदा कुञ्जच्छिद्रे भवतु मम राधे नु नयनम्।।१०४।।

करं ते पत्रालिं किमपि कृचयोः कर्त्तुमुचितं
पदं ते कुञ्जेषु प्रियमभिसरंत्या अभिसृतौ।
दृशौ कुञ्जच्छिद्रैस्तव निभृतकेलिं कलयितुं
यदा वीक्षे राधे तदपि भविता किं शुभदिनम्।।१०५।।

रहोगौष्ठीश्रोतु तव निजविटेन्द्रेण ललितां
करे धृत्वा त्वां वा नवरमणतल्पे घटयितुम्।
रतामर्दस्रस्तं कचभरमतो संयमयितुं
विदध्याः श्रीराधे मम किमधिकारोत्सवरसम्।।१०६।।

वृन्दाटव्यां नवनवरसानन्दपुञ्जे निकुञ्जे
गुञ्जद्भृंगीकुलमुखरिते मन्जुमन्जुप्रहासैः।
अन्योन्यक्षेपणनिचयनप्राप्तसंगोपनाद्यैः
क्रीडज्जीयाद्रसिकमिथुनं फ्लृप्तकेलीकदम्बम्।।१०७।।

रूपं शारदचन्द्रकोटिवदने धम्मिल्लमल्लीस्रजा-
मामो दैर्विकलीकृतालिपटले राधे कदा तेऽद्भुतम्।।
ग्रैवेयोज्जवलकम्बुकण्ठि मदुदोर्वल्लीचलत्कंकणे
वीक्षे पटट्दुकूलवासिनि रणन्मंजीरपादामबुजे।।।१०८।।

इतो भयमितस्त्रता कुलमितो यशः श्रीरितो
हिनस्त्यखिलश्रृङ्खलामपि सखीनिवासस्त्वया।
सगद्गदमुदीरितं, सुबहुमोहननाकांक्षया
कथंकथमयीश्वरि प्रहसितैः कदाम्रेड्यसे।।१०९।।

श्यामे चाटुरुतानि कुर्वति सहालापान्प्रणेत्री मया
गृह्णाने च दुकूलपल्लवमहो हुंकृत्य मां द्रक्ष्यसि।
बिभ्राणे भुजवल्लिमुल्लसितया रोमस्रजालकृतां
दृष्टवा त्वां रसलीनमूर्तिमथ किं पश्यामि हास्यं ततः।।११०।।

अहो रसिकशेखरः स्फुरति कोपि वृन्दावने
निकृञ्जनवनागरीकुचकिशोरकेलियप्रियः।
करोतु स कृपां सखीप्रकटपूर्णनत्युत्सवो
निजप्रियतमापदे रसमये ददातु स्थितिम्।।१११।।

विचित्रवरभूषणोज्ज्वलदुकूलसत्कंचुकैः
सखीभिरतिभूषिता तिलकगन्धमाल्यैरपि।
स्वयं च सकलाकलासु कुशलीकृता नः कदा
सुरासमधुरोत्सवे किमपि वेशयेत्स्वामिनी।।११२।।

कदा सुमणिंकिकिणीवलयनूपुरप्रोल्लस-
न्महामधुरमण्डलाद्भुतविलासरासोत्सवे।
अपि प्रणयिनो बृहद्भुजगृहीतकण्ठ्यो वयं
परं निजरसेश्वरीयचरणलक्ष्य वीक्षामहे।।११३।।

यद्गोविन्दकथासुधारसहृदे चेतो मया जृम्भितं
यद्वा तद्गुणकीर्त्तनार्चनविभूषणाद्यैं र्दिनं प्रापितम्।
यद्यत्प्रीतिरकारि तत्प्रियजनेष्वात्यंतिकी तेन मे
गोपेन्द्रात्मजजीवनप्रणयिनी श्रीराधिका तुष्यतु।।११४।।

रहो दास्यं तस्याः किमपि वृषभानोर्व्रजवरी-
यसः पुत्र्याः पूर्णप्रणयरसमूर्त्तेर्यदि लभे।
तदा नः किं धर्म्मैं किमु सुरगणैं किं च विधिना
किमीशेन श्यामप्रियमिलनयत्नैरपि च किम्।।११५।।

चन्द्रास्ये हरिणाक्षि देवि सुनसे शोणाधरे सुस्मिते
चिल्लक्ष्मीभुजवल्लि कम्बुरुचिरग्रीवे गिरीन्द्रस्तनि।
भग्र्जन्मध्यबृहन्नितम्बकदलीखण्डोरुपादाम्बुज-
प्रोन्मीलन्नखचन्द्रमण्डलि कदा राधे मयाराध्यसे।।११६।।

राधापादसरोलभक्त्किमचलामुद्वीक्ष्य निष्कैतवां
प्रीतः स्वं भजतोपि निर्भरमहाप्रेम्णाधिकं सर्वशः।
आलिंगत्यथ चुम्बति स्ववदनात्ताम्बूलमास्येर्पयि-
त्कण्ठे स्वां वनमालिकामपि मम न्यस्येत्कदा मोहनः।।११७।।

लावण्यं परमाद्भुतं रतिकलाचातुर्यमत्यद्भुतं
कान्तिः कापि महाद्भुता वरतनोर्लीलागतिश्चाद्भुत।
दृग्भंगी पुनरद्भुताद्भुततमा यस्याः स्मितं चाद्भुतं
सा राधाद्भुतमूर्त्तिरद्भुतरसं दास्यं कदा दास्यति।।११८।।

भ्रमद्भ्रुकुटिसुन्दरं स्फुरितचारुबिम्बाधरं
ग्रहे मधुरहुंकृतं प्रणयकेलिकोपाकुलम्।
महारसिकमौलिना सभयकौतुकं वीक्षितं
स्मरामि तव राधिके रतिकलासुखं श्रीमुखम्।।११९।।

उन्मीलन्मुकुटच्छटापरिलसद्दिक्चक्रवालं स्फुर-
त्केयूराङ्गदहारकेकणघटानिर्धूतरत्नच्छवि।
श्रोणीमण्डलकिंकिणीकलरवं मंजीरमंजुध्वनि
श्रीमत्पादसरोरुह भज मनो राधाभिधानं महः।।१२०।।

श्यामामण्डलमौलिमण्डनमणिः श्यामानुरागस्फुर-
द्रोमोद्भेदविभाविताकृतिरहो काशमीरगौरच्छविः।
सातीवोन्मदकामकेलितरला मां पातु मन्दस्मिता
मन्दारद्रुमकुञ्जमन्दिरगता गोविन्दपट्टेश्वरी।।१२१।।

उपास्यचरणाम्बुजे व्रजभृतां किशोरीगणै
र्महद्भिरपि पूरुषैरपरिभाव्यभावोत्सवे।
अगाधरसधामनि स्वपद्मसेवाविधौ
विधेहि मधुरोज्ज्वलामधिकृतिं ममाधीश्वरि।।१२२।।

आनम्रानन चन्द्रमीरितदृगापाङ्गच्छटामन्थरं
किंचिद्दर्शिशिरोवगुण्ठनपटलीलाविलासावधिम्।
उन्नीयालकमञ्जरीः कररुहैरालक्ष्यसन्नागर.
स्यांगेङ्गं तव राधिके सचकितालोकं कदा लोकये।।१२३।।

राकाचन्द्रो वराको यदनुपमरसानन्दकन्दाननेन्दो-
स्तत्तादृक्चन्द्रिकाया अपि किमपि कलामात्रकस्याणुतोपि।
यस्याः शोणाधरश्रीविधृतनवसुधामधुरीसारसिन्धुः
सा राधा कामबाधाविधुरमधुपतिप्राणदा प्रीयतां नः।।१२४।।

राकानेकविचित्रचन्द्र उदितः प्रेमामृतज्योतिषां
वीचिभिः परिपूरयेदगणितब्रह्माण्डकोटिं यदि।
वृन्दारण्यनिकुञ्जसीमनि तदाभासः परं लक्ष्यते
भावेनैव यदा तदैव तुलये राधे तव श्रीमुखम्।।१२५।।

कालिन्दीकूलकल्पद्रुमतलनिलयप्रोल्लसत्केलिकन्दा,
वृन्दाटव्यां सदैव प्रकटतररहोवल्लभीभावभव्या।
भक्तानां हृत्सरोजे मधुररसुधास्यन्दिपादरविन्दा,
सान्द्रानन्दाकृतिर्नः स्फुरतु नवनवप्रेमलक्ष्मीरमन्दा।।१२६।।

शुद्धप्रेमैकलीलानिधिरहह महातङ्कमङ्कस्थिते च
प्रेष्ठे बिभ्रत्यदभ्रस्फुरदतुलकृपास्नेहमाधुर्यमूर्तिः।
प्राणालीकोटिनीराजितपदसुषमामाधुरी माधवेन
श्रीराधा मामगाधामृतरसभरिते कर्हि दास्येभिषिञ्चेत्।।१२७।।

वृन्दारणनिकुञ्जसीमसु सदा स्वानंगरगोत्सवै-
मार्द्यत्यद्भुतमाधवाधरसुधामाध्वीकसंस्वादनैः
गोविन्दप्रियवर्गदुर्गमसखीवृन्दैरनालक्षिता
दास्यं दास्यति मे कदा नु कृपया वृन्दावनाधीश्वरी।।१२८।।

मल्लीदामनिबद्धचारुकबरं सिन्दूररेखोल्लस-
त्सीमन्त नवरत्नचित्रतिलकं गण्डोल्लसत्कुण्डलम्।
निष्कग्रीवमुदारहारमरुणभ्रिच्छुकूलं नवं
विद्युत्कोटिनिभं स्मरोत्सवमयं राधाख्यमीक्षे महः।।१२९।।

प्रेमोल्लसैकसीमा परमरसचमत्कारवैचित्र्यसीमा
सौन्दर्यस्यैकसीमा किमपि नववयोरूपलावण्यसीमा।
लीलामाधुर्यसीमा निजजनपरामोदार्यवात्सल्यसीमा
सा राधा सौख्यसीमा जयति रतिकलाकलिमाधुर्यसीमा।।१३०।।

यस्यास्तत्सुकुमारसुन्दरपदोन्मीलन्नखेन्दुच्छटा-
लावण्यैकलवोपजीविसकलाश्यामामणीमण्डलम्।
शुद्धप्रेमविलासमूर्तिरधिकोन्मीलन्महामाधुरी-
धारासारधुरीणकेलिविभवा सा राधिका मे गति।।१३१।।

कलिन्दबिरिनन्दिनीसलिलबिन्दसंदोहभृन्
मृदूद्गतिरतिश्रमं मिथुनमद्भुतक्रीडया।
अमन्दरसंतुदिलभ्रमरवृन्दाटवी-
निकुञ्जवरमन्दिरे किमपि सुन्दरं नन्दति।।१३२।।

व्याकोशेन्दीवरविकसितामन्दहेमारविन्द.
श्रीमन्निस्यन्दनरतिरसान्दोलिकन्दर्पकेलि।
वृन्दारण्ये नवरससुधास्यंन्दिपादाविन्दं
ज्योतिर्द्वद्व किमपि परमानन्दकनदं चकास्ति।।१३३।।

ताम्बूलं क्वचिदर्पयामि चरणौ सम्वाहयामि क्वचिन्
मालाद्यैः परिमण्डये क्वचिदहोसम्वीजयामि क्वचित्।
कर्पूरादिसुवासितं क्व च पुनः सुस्वादु चामूभोमृत
पायाम्येव गृहे कदा खलु भजे श्रीराधिकामाधवौ।।१३४।।

प्रत्येङ्गोच्छलदुज्जवलामृतरसप्रेमैकपूर्णाम्बुधि.
लावण्यैकसुधानिधि पुरुकृपावात्सल्यसाराम्बुधि।
तारुण्यप्रथमप्रवेशविलसन्माधुर्यसाम्राज्यभू.
र्गुप्तः कोपि महानिधिर्विजयते राधासैकावधि।।१३५।।

यस्याः स्फूर्जत्पदनखमणिज्योतिरेकच्छटायाः
सान्द्रप्रेमामृतरसमहासिन्धुकोटिर्विलासः।
सा चेद्राधा रचयति कृपादृष्टिपातं कदाचि-
न्मुक्तिस्तुच्छीभवति बहुशः प्राकृताप्राकृतश्रीः।।१३६।।

कदा वृन्दारण्ये मधुरमधुरानन्दरसदे
प्रियेश्चर्याः केलीभवननवकुञ्जानि मृगये।
कदा श्रीराधायाः पदकमलमाध्वीकलहरी-
परीवाहैश्चेतोमधुरकरमधीरं मदयिता।।१३७।।

राधाकेलिनिकुञ्जवीथिषु चरन्राधाभिधामुच्चर-
न्राधाया अनुरूपमेव परमं धर्मं रसेनाचरन्।
राधायाश्चरणाम्बुजं परिचरन्नानोपचारैर्मुदा
कर्हि स्यां श्रुतिशेखरोपरि चरन्नाश्चर्यचर्या चरन्।।१३८।।

यातायातशतेन संगमितयोरन्योन्यकवत्रोल्लस-
च्चन्द्रालोकनसम्प्रभूतबहुलानडगाम्बुधिक्षोभयोः।
अन्तःकुञ्जकुटीरतल्पगतयोर्दिव्याद्भुतक्रीडयो
राधामाधवयोः कदा नु श्रृणुयां मञ्जीरकाञ्चीध्वनिम्।।१३९।।

अहो भुवनमोहनं मधुरमाधववीमण्डपे
मधूत्सवसमुत्सुकं किमपि नीलपीतच्छवि।
विदग्धमिथुनं मिथोदृढतररानुरागोल्लसन्,
मदं मदयते कदा चिरतरं मदीयं मनः।।१४०।।

राधानामसुधारसं रसयितु जिह्वास्तु मे विह्वला
पादौ तत्पदकांकितासु चरतां वृन्दाटवीवीथिषु।
तत्कर्मैव करः करोतु हृदयं तस्याः पदं ध्यायता-
त्तद्भावोत्सवतः परं भवतु मे तत्प्राणनाथे रति।।१४१।।

मन्दीकृत्य मुकुन्दसुन्दरपदद्वन्द्वारविन्दामल-
प्रेमानन्दमन्दमिन्दुतिलकाद्युन्मादकन्दं परम्।

राधाकेलिकथारसाम्बुधिचलद्वीचीभिरान्दोलितं
वृन्दारण्यनिकुञ्जमन्दिरवरालिन्दे मनो नन्दतु।।१४२।।

राधानामैव कार्य्यं ह्यनुदिनमिलितं साधनाधीशकोटि-
स्त्याज्यो नीराज्यराधापदकमलसुधां सत्पुमर्थाग्रकोटि।
राधापादाब्जलीलाभुवि जयति सदामन्दमन्दारकोटिः
श्रीराधाकिंकरीणां लुठति चरणयोरद्भुता सिद्धिकोटि।।१४३।।

मिथोभङ्गीकोटिप्रवहदनुरागामृतरसो-
त्तरंगभ्रभङ्गक्षुभितबहिरभ्यन्तरमहो।
मदाघूर्णन्नेत्रं रचयति विचित्रं रतिकला
विलासं तत्कुञ्जे जयति नवकैशोरमिथुनम्।।१४४।।

काचिद्वृन्दावननवलता मन्दिरे नन्दसूनो-
र्द्प्यद्दोष्कन्दलदृढपरीरम्भनिष्पंदगात्री।
दिव्यानन्दाद्भुतरसकलाः कल्पयन्त्याविरास्ते
सान्द्रानन्दामृतरसघनप्रेममूर्तिः किशोरी।।१४५।।

न जानीते लोकं न च निगमजातं कुलपरं-
परां वा नो जानात्यहह न सतां चापि चरितम्।
रसं राधायामाभजति किल भावं व्रजमणौ
रहस्ये तद्यस्य स्थितिरपि न साधारणगति।।१४६।।

ब्रह्मानन्दैकवादाः कतिचन भगवद्वन्दनानन्दमत्ताः
केचिद् गोविन्दसख्याद्यनुपम परमानन्दमन्ने स्वदन्ते।
श्रीराधाकिंकरीणां त्वखिलसुखचमत्कारसारैकसीमा
त्पादाम्बोजराजन्नखमणिविलसज्ज्योतिरेकच्छटापि।।१४७।।

न देवैर्ब्रह्माद्यैर्न खलु हरिभक्तैर्न सुहृदा-
दिभिर्यद्वै राधामधुपतिरहस्यं सुविदितम्।
तयोर्दासीभूत्वा तदुपचितकेलीरसमये
दुरन्ताः प्रत्याशा हरहर दृशोर्गोचरयितुम्।।१४८।।

त्वयि श्यामे नित्ये प्रणयिनि विदग्धे रसनिधौ
प्रिये भूयोभूयः सुदृढमतिरागो भवतु मे।
इति प्रेष्ठेनोक्ता रमण मम चित्ते तव वचो
वदन्तीतिस्मेरा मम मनसि राधा विलसतु।।१४९।।

सदानन्दं वृन्दावननलतामन्दिरवरे-
ष्वमन्दैः कन्दर्पोन्मदरतिकलाकौतुकरसम्।
किशोरं तज्ज्योतिर्युगलमतिघोरं मम भवं
ज्वलज्जवालं शीतैः स्वपदमकरन्दैः शमयतु।।१५०।।

उन्मीलन्नवमल्लिदामविलसद्धम्मिल्लभारे बृह-
च्छ्रोणीमण्डलमेखलाकलरवे शिञ्जत्सुमञ्जीरिणि।
केयूराङ्गदकङ्कणावलिलसच्छोर्वल्लिदीतिच्छटे
हेमाम्भोरुहकुड्मलस्तनि कदा राधे दृशा पीयसे।।१५१।।

अमर्यादोन्मीलत्सुरतसपीयूषजलधे-
स्तरंगैरुत्तुंगैरिव किमपि दोलायिततनुः।
स्फुरंती प्रेयोंके स्फुटकनकपंकेरुहमुखी
सखीनां नो राधे नयनसुखमाधास्यसि कदा।।१५२।।

क्षरतीव प्रत्यक्षरमनुपमप्रेमजलधिं
सुधाधारावृष्टिरिव विदधती श्रोत्रपुटयोः।
रसार्द्रा समृद्धी परमसुखदा शीतलतरा
भवित्री किं राधे तव सह मया कापि सुकथा।।१५३।।

अनुल्लिख्यानन्तानपि सदपराधान्मधुपति-
र्महाप्रेमाविष्टस्तव परमदेयं विमृशति।
तवैक श्रीराधे गृणत इह नामामृतरसं
महिम्नः कः सीमां स्पृशति तव दास्यैकमनसाम्।।१५४।।

लुलितनवलवङ्गोदारकर्पूरपूरं
प्रियतममुखचन्द्रोद्गीर्णताम्बूलखण्डम्।
घनपुलककपोला स्वादयन्ती मदास्ये-
र्पयतु किमति दासी वत्सला कर्हि राधा।।१५५।।

सौन्दर्यामृतराशिरद्भुतमहालावण्यलीलाकला
कालिन्दीवरवीचिडम्बरपरिस्फूर्जत्कटाक्षच्छवि।
सा कापि स्मरकेलिकोमलकलावैचित्र्यकोटिस्फुर-
त्प्रेमानन्दघनाकृतिर्दिशतु मे दास्यं किशोरीमणिः।।१५६।।

दुकूलमतिकोमलं कलयदेव कौसुम्भकं
निबद्धमधुमल्लिकाललितमाल्यधम्मिल्लकम्।
बृहत्कटितटस्फुरन्मुरन्मुखरमेखलालंकृतं
कदा नु कलयामि तत्कनकचम्पकाभं महः।।१५७।।

कदा रासे प्रेमोन्मदरसविलासेद्भुतमये
दिशोर्मध्ये भ्राजन्मधुपतिसखीवृन्दवलये।
मुदान्तः कान्तेन स्वरचितमहालास्यकलया
निषेवे नृत्यन्तीं व्यजननवताम्बूलशकलैः।।१५८।।

प्रसृमरपटवासे प्रेमसीमाविकासे
मधुरमधुरहासे दिव्यभूतशाविलासे।
पुलकितदयितांसे सम्वलद्बाहुपाशे
तदतिललितरासे कर्हि राधामुपासे।।१५९।।

यदि कनकसरोजं कोटिचन्द्रांशुपूर्णं
नवनवमकरन्दस्यंदिसौंदर्यधाम।
भवति लसितचंचलत्खजनद्वन्द्वमास्यं
तदपि मधुरहास्यं दत्तदास्यं न तस्यां।।१६०।।

सुधाकरमुधाकरं प्रतिपदस्फुरन्माधुरी-
धुरीणनवचन्द्रिकाजलधितुन्दिलं राधिके।
अतृप्तहरिलोचनद्वयचकोरपेयं कदा
रसाम्बुधिसमुन्नतं वदनचन्द्रमीक्षे तव।।१६१।।

अङ्गप्रत्यङ्गरिङ्गन्मधुरतरमहार्कीर्तिपीयूषसिन्धो-
रिन्दोः कोटीर्विनिन्दद्वदनमति मदालोलनेत्र दधत्याः।
राधायाः सौकुमार्याद्भुतललिततनोः केलिकल्लोलिनीना-
मानंदस्यांदिनीनां प्रणयरसमयान् किं विगाहे प्रवाहान्।।१६२।।

मत्कण्ठे किं नखरशिखया दैत्यराजोस्मि नाहं
मैवं पीडां कुरु कुचतटे पूतना नाहमस्मि।
इत्थं कीरैरनुकृतवचः प्रेयसा संगतायाः
प्रातः श्रोष्ये तव सखि कदा के केलिकुञ्जे मृजन्ती।।१६३।।

जाग्रत्स्वप्नसुषुप्तिषु स्फुरतु मे राधापदाब्जच्छटा
वैकुण्ठे नरकेथ वा मम गतिर्नान्यास्तु राधां विना।
राधाकेलिकथासुधाम्बुधिमहावीचीभिरान्दोलितं
कालिन्दीतटकुञ्जमन्दिरवरालिन्दे मनो विन्दतु।।१६४।।

आलिन्दे कालिन्दीतटनवलतामन्दिरगते
रतामर्दोद्भूतश्रमजलभरापूर्णवपुषोः।
सुखस्पर्शेनामीलितनयनयोः शीतमतुलं
कदा कुर्यां संवीजनमहह राधामुरभिदोः।।१६५।।

क्षणं मधुरगानतः क्षणममन्दहिन्दोलतः
क्षणं कुसुमवायुतः सुरतकेलिशिल्पैः क्षणम्।
अहो मधुरसद्रसप्रणयकेलिवृन्दावने
विदग्धवरनागरीरसिकशेखरौ खेलतः।।१६६।।

अद्य श्यामकिशोरमौलिकरहह प्राप्तो रजन्या मुखे
नीत्वा तां करयोः प्रगृह्य सहसा नीपाटवीं प्राविशत्।
श्रोष्ये तल्पमिलन्महारतिभरे प्राप्तोति सीत्कारितं
तद्वीचीसुखतर्जनं किमु हरेः स्वश्रोत्ररन्ध्राश्रितम्।।१६७।।

श्रीमद्राधे त्वमथ मधुरं श्रीयशोदाकुमारे
प्राप्ते कैशोरकमतिरसाद्वल्गसे साधुयोगम्।
इत्थं बाले महसि कथया नित्यलीलावयः श्री
जातावेशा प्रकटसहजा किन्नू दृश्या किशोरी।।१६८।।

एकं काञ्चनचम्पकच्छवि परं नीलाम्बुदश्यामलं
कन्दर्पोत्तरलं तथैकमपरं नैवानुकूलं बहिः।
किंचैकं बहुमानभङ्गि रसवच्चाटूनि कुर्वत्परं
वीक्षे क्रीडतिकुञ्जसीम्नि मदहो द्वन्द्वं महामोहनम्।।१६९।।

विचित्ररतिविक्र दधदनुक्रमंमादाकुलं
महामदमावेगतो निभृतमंजुकुञ्जोदरे।
अहो विनियन्नवं किमपि नीलपीतं पट
मिथो मिलितमद्भुतं जयति पीतनीलं महः।।१७०।।

करे कमलमद्भुतं भ्रमयतोर्मिथोंसार्पित-
स्फुरत्पुलकदोर्लतायुगलयोः स्मरोन्मत्तयोः।
सहासरसपेशलं मदकरीन्द्रभङ्गीशतै-
र्गतिं रसिकयोर्द्वयोः स्मरत चारुवृन्दावने।।१७१।।

खेलन्मुग्धाक्षिमीनस्फुरदधरमणीविद्रुमश्रोणिभार-
द्वीपायामोत्तरंगस्मरकभकटाटोपवक्षोरुहायाः।
गम्भीरावर्त्तनाभेर्बहलहरिमहाप्रेमपीयूषसिन्धोः
श्रीराधायाः पदाम्बोरुहपरिचरणे योग्यतामेव मृग्ये।।१७२।।

विच्छेदाभासमानादहह निमिषतो गात्रविस्रंसनादौ
चंचत्कल्पाग्निकोटिज्वलितमिव भवेदुबाह्यामभ्यंतरं च।
गाढस्नेहानुबन्धग्रथितमिव तयोरद्भुतप्रेममूर्त्योः
श्रीराधामाधवाख्यं परमिह मधुरं तद्वयं धाम जाने।।१७३।।

कदा रत्युन्मुक्तं कचभरमहं संयमयिता
कदा वा सन्धास्ये त्रृटितनवमुक्तावलिमपि।
कदा वा कस्तूर्य्यास्तिलकमपि भूयो रचयिता
निकुञ्जान्तर्वृत्ते नवरमिरणे यौवनमणेः।।१७४।।

किं ब्रूमोन्यत्र कुण्ठीकृतकजनपदे धाम्न्यपि श्रीविकुण्ठे
राधामाधुर्यवित्ता मधुपतिरथ तन्माधुरीं वेत्ति राधा।
वृन्दारण्यस्थलीयं परमरससुधामाधुरीणां धुरीणा
तद्द्वंछं स्वादनीयं सकलमपि ददौ राधिकाकिंकरीभ्यः।।१७५।।

लसद्वदनपंकजा नवगभीरनाभिभ्रमा
नितम्बपुलिनोल्लसन्मुखरकांचिकादम्बिनी।
विशुद्धरसवाहिनी रसिकसिन्धुसङ्गोन्मदा
सदा सुरतरङ्गिणी जयति कापि वृन्दावने।।१७६।।

अनङ्गनवरङ्गिणीरसतरङ्गिणीसङ्गतां
दधत्सुखसुधामये स्वतनुनीरधौ राधिकाम्
अहो मधुपकाकलीमधुरमाधवीमण्डपे
स्मरक्षुभितमेधते सुरतसीधुमत्तं महः।।१७७।।

रोमालीमिहिरात्मजा सुललिते बल्धूकबन्धुप्रभा
सर्वांगे स्फुटचम्पकच्छविरहो नाभीसरः शोभना।
वक्षोजस्तबका लसद्भुजलता शिंजापतच्छुंकृतिः
श्रीराधा हरते मनो मधुपतेरन्येव वृन्दाटवी।।१७८।।

राधामाधवयोर्विचित्रसुरतारम्भे निकुञ्जोदर-
स्रस्तप्रस्तसङ्गतैर्वपुरलंकुर्वेङगरागै कदा।
तत्रैव त्रुटिताः स्रजो निपतिताः संधाय भूयः कदा
कण्ठे धारयितास्मि मार्जनकृते प्रातः प्रविष्टास्म्यहम्।।१७९।।

श्लोकान्प्रेष्ठयशोऽङ्किताञ्गृहशुकानध्यापयेत्कर्हिचिद्
गुञ्जामञ्जुलहारबर्हमुकुटं निर्माति काले क्वचित्।
आलिख्य प्रियामूर्त्तिमाकुलकुचौ संघट्टयेद्वा कदा-
प्येवंव्यापृतिभिर्दिनंनयति मे राधा प्रियास्वामिनी।।१८०।।

प्रेयः सङ्गसुधासदानुभविनी भूयोभवद्भाविनी
लीलापंचमरागिणी रतिकनाभंगीशताद्भाविनी।
कारुण्यद्रवभाविनी कटितटे कांचीकलाराविणी
श्रीराधैव गतिर्ममास्तु पदयोः प्रेमामृतश्राविणी।।१८१।।

कोटीन्दुच्छविहासिनी नवसुधासंभासंभाषिणी
वक्षोजद्वितयेन हेमकलशश्रीगर्वनिर्वासिनी।
चित्रग्रामनिवासिनी नवनवप्रेमोत्सवोल्लासिनी
वृन्दारण्यविलासिनी किमु रहो भूयाद्धृदुल्लासिनी।।१८२।।

कदा गोविन्दाराधनललितताम्बूलशकलं
मुदा स्वादंस्वाद पुलकिततनुर्मे प्रियसखी।
दुकूलेनोन्मीलन्नवकमलकिंजल्करुचिना
निवीतांगी संगीतकनिजकलाः शिक्षायति माम्।।१८३।।

लसच्छ्शनमौक्तिकप्रवरकान्ति पूरस्फुर-
न्मनोज्ञनवपल्लवाधरमणिच्छटासुन्दरम्।
चलन्मकरकुण्डलं चकितचारुनेत्रांचलं
स्मरामि तव राधिकेवदनमण्डलं निर्मलम्।।१८४।।

चलत्कुटिलकुन्तलं तिलकशोभिभालस्थलं
तिलप्रसवनासिकापुटविराजितमुक्ताफलम्।
कलंकरहितामतच्छविसमुज्जवलं राधिके
तवातिरतिपेशलं वदनमण्डलं भावये।।१८५।।

पूर्णप्रेमामृतरससमुल्लाससौभाग्यसारं
कुञ्जे कुञ्जे नवरतिकलाकौतुकेनात्तकेलि।
उत्फुल्लेन्दीवरकनकयोः कान्तिचौरं किशोरं
ज्योतिर्द्वन्द्वं किमपि परमानन्दं चकास्ति।।१८६।।

ययोन्मीलत्केलीविलसितकटाक्षैककलया
कृतो बदी वृन्दाविपिनकलभेन्द्रो मदकलः।
जडीभूतः क्रीडामृग ईव यदाज्ञालवकृते
कृती नः सा राधा शिथिलयतु साधारण गतिम्।।१८७।।

श्रीगोपेन्द्रकुमारमोहनमहाविद्ये स्फुरन्माधुर-
सारस्फाररसाम्बुराशिसहजप्रस्यन्दिनेत्रांचले।
कारुण्यार्द्रकटाक्षभंगिमधुरस्मेराननाम्भोरुहे
हाहा स्वामिनि राधिके मयि कृपादृष्ष्टिंमनाङ् निक्षिप।।१८८।।

ओष्ठप्रान्तोच्छलितदयितोद्गीर्णताम्बूलरागा
रागानुच्चैर्निजरचियता चित्रभंग्योन्नयन्ती।
तिर्यग्ग्रीवा रुचिररुचिरोदञ्चदाकुञ्चितभ्रूः
प्रेयः पार्श्वेविपुलपुलकैर्मण्डिता भाति राधा।।१८९।।

किं रे धूर्त्तप्रवर निकटं यासि नः प्राणसख्या
नूनं बाला कुचतटकरस्पर्शमात्राद्विमुह्येत्।
इत्थं राधे पथिपथि रसान्नागरं तेनुलग्नं
क्षिप्त्वा भंग्या हृदयमुभयोः कर्हि सम्मोहयिष्ये।।१९०।।

कदा वा राधायाः पदकमलमायोज्य हृदये
दयेशं निःशेषनियतमहि जह्यामुपविधिम्।
कदा वा गोविन्दः सकलसुखदः प्रेमकरणा
दनन्ये धन्ये वै स्वयमुपनयेत स्मरकलम्।।१९१।।

कदा वा प्रोद्दामस्मरसरसंरम्भरभस.
प्ररूढस्वेदाम्भः प्लुतलुलितचित्राखिलतनू।
गतौ कुञ्जद्वारे सुखमरुति संवीज्य परया
मुदाहं श्रीराधारसिकतिलकौ स्यां सुकृतिनि।।१९२।।

मिथः प्रेमावेशाद्घनपुलकदोर्वल्लिरचित.
प्रगाढाश्लेषेणो त्सवरसभरोन्मीलिततदृशौ।
निकुञ्जक्लृप्ते वै नवकुसुमतल्पेधिशयितौ
कदा पत्संवाहोदिभिरहमधीशौ नु सुखये।।१९३।।

मदारुणविलोचनं कनकदर्पकामोचनं
महाप्रणयमाधुरीरसविलासनित्योत्सुकम्।
लसन्नववयः श्रिया ललितभंगिलीलामयं
हृदा तदहामुद्वहे किमहि हेमगौरं महः।।१९४।।

मदाघूर्णन्नेत्रं नवरतिरसावेशविवशो-
ल्लसद्गात्रं प्राणप्रणयपरिपाट्यां परतरम्।
मिथो गाढाश्लेषाद्वलयमिव जातं मरकत-
द्रुतस्वर्णच्छायं स्फुरतु मिथुनं तन्मम हृदि।।१९४।।

परस्परं प्रेमरसे निमग्नमशेषसंमोहनरूपकेलि।
वृन्दावनान्तर्नवकुञ्जगेहे तन्नीलपीतं मिथुनं चकास्ति।।१९६।।

आशास्य दास्यं वृषभानुजाया-
स्तीरे समध्यास्य च भानुजायाः।
कदा नु वृन्दावनकुञ्जवीथी-
ष्वहं नु राधे ह्यतिथिर्भवियम्।।१९७।।

कालिन्दीतटकुञ्जे पुञ्जीभूतं रसामृतं किमपि।
अद्भुतकेलिनिधान निरवधि राधाभिधानमुल्लसति।।१९८।।

प्रीतिरिव मूर्तिमती रससिन्धोः सारसम्पदिव विमला।
वैदग्धीनां हृदयं काचन वृन्दावलाधिकारिणी जयति।।१९९।।

रसघनमोहनमूर्तिं विचित्रकेलिमहोत्सवोल्लसितम्।
राधाचरणविलोडितरुचिरशिखण्डं हरिं वन्दे।।२००।।

कदा गायंगायं मधुरमधुरीत्या मधुभिद-
श्चरित्राणि स्फारामृतरसविचित्राणि बहुशः।
मृजन्ती तत्केलीभवनमभिरामं मलयज
च्छटाभिःसिञ्चन्ती रसहृदनिमग्नास्मि भविता।।२०१।।

उदञ्चद्रोमाञ्चप्रचयखचितां वेपथमतीं
दधानां श्रीराधामतिमधुरलीलामयतनुम्।
कदा वा कस्तूर्या किमपि रचयन्त्येव कुचयो-
र्विचित्रां पत्रालीमहमहह वीक्षे सुकृतिनी।।२०२।।

क्षणं सीत्कुर्वन्ती क्षणपथ महावेपथुमती
क्षणं श्यामश्यामेत्यमुममभिलपन्ती पुलकिता।
महोप्रेमा कापि प्रमदमदनोद्दामरसदा
सदानन्दा मूर्तिर्जयति वृषभानोः कुलमणिः।।२०३।।

यस्याः प्रेमघनाकृतेः पदनखज्योत्स्नाभरस्नपित-
स्वान्तानां समुदेति कापि सरसा भक्तिश्चमत्कारिणी।
सा मे गोकुलभूपनन्दनमनश्चोरी किशोरी कदा
दास्यं दास्यति सर्ववेदशिरसां यत्तद्रहस्यं परम्।।२०४।।

कामं तूलिकया करेण हरिणा यालक्तकैरङ्किता
नानाकेलिविदग्धगोपरमणीवृन्दे तथा वन्दिता।
या संगुप्तया तथोपनिषदां हृद्येव विद्योतते
सा राधाचरणद्वयी मम गतिर्लास्यैकलीलामयी।।२०५।।

सान्द्रप्रेमसौधवर्षिणि नवोन्मीन्महामाधुरी-
साम्राज्यैकधुरीणकेलिविभवत्कारुण्यकल्लोलिनि।
श्रीवृन्दावनचन्द्रचित्तहरिणि बन्धुस्फुरद्वागुरे
श्रीराधे नवकुञ्जनागरि तव क्रीतास्मि दास्योत्सवैः।।२०६।।

स्वेदापूरः कुसुमचयनैर्दूरतः कण्टकाङ्को
वक्षोजऽस्यास्तिलकविलयो हन्त घर्माम्भसैव।
ओष्ठं सख्या हिमपवनतः सव्रणो राधिके ते
क्रूरास्वेवं स्वघटितमहो गोपये प्रेष्ठसंगम्।।२०७।।

पातंपातं पदकमलयोः कृष्णभृंगेण तस्याः
स्मेरास्येन्दोर्मुकुलितकुचद्वन्द्वहेमारविन्दम्।
पीत्वा वक्त्राम्बुजमतिरसान्नूनमन्तः प्रवेष्टुं-
मत्यावेशान्नखरशिखया पाट्यमानं किमीक्षे।।२०८।।

अहो तेमी कुञ्जास्तदनुपमरासस्थलमिदं
गिरिद्रोणी सैव स्फुरति रतिरंगे प्रणयिनी।
न वीक्षे श्रीराधां हरहर कृतोपीति शतधा
विदीर्येत प्राणेश्वरि मम कदा हन्त हृदयम्।।२०९।।

इहैवाभूत्कुञ्जे नवरतिकलामेहनतनो-
रहो अत्रानृत्यच्छयितसहिता सा रसनिधिः।
इति स्मारंस्मारं तव चरितपीयूषलहरीं
कदा स्यां श्रीराधे चकित इह वृन्दावनभुवि।।२१०।।

श्रीमद्बिम्बाधरे ते स्फूरति नवसुधामाधुरीसिन्धुकोटी
नेंत्रान्तस्ते विकीर्णाद्भुतकुसुमधनुश्चण्डसत्काण्डकोटिः।
श्रीवक्षोजे तवातिप्रमदरसकलासारसर्वस्वकोटिः
श्रीराधे त्वत्पदाब्जात्स्रवति निरवधिप्रेमपीयूषकोटिः।।२११।।

सान्द्रानन्दोन्मदरसघनप्रेमपीयूषममूर्त्तेः
श्रीराधाया अथ मधुपतेः सुप्तयोः कुञ्जतल्पे।
कुर्वाणाहं मृदुमृदुपदाम्बोजसम्वाहनानि
शय्यान्ते किं किमपि पतिता प्राप्ततन्द्रा भवेयम् ।।२१२।।

राधापादारविन्दोच्छलितनवरसप्रेमपीयूषपुञ्जे
कालिन्दीकूलकुञ्जे हृदि कलितमहोदारमाधुर्यभावः।
श्रीवृन्दारण्यवीथीललितरतिकलानागरीं तां गरीयो
गम्भीरैकानुरागां मनसि परिचरन् विस्मृतान्यः कदा स्याम्।।२१३।।

अदृष्ट्वा राधाङ्के निमिषमपि तं नागरमणिं
तया वा खेलन्तं ललितललितानङ्गकलया।
कदाहं दुःखाब्धौ सपदि पतिता मूर्च्छितवती
न तामाश्वास्यार्त्ता सुचिरमनुशोचे निजदशाम्।।२१४।।

भूयोभूयः कमलनयने किं मुधा वार्यतिसौ
वाड्मात्रेपि त्वदनुगमनं न त्यजत्येव धूर्त्तः।
किंचिद्राधे कुरु कुचतटीप्रान्तमस्य म्रदीय -
श्चक्षुर्द्वारा तमनुपतितं चूर्णतामेतु चेतः।।२१५।।

किं वा नस्तैः सुशास्त्रैः किमथ तदुदितैर्वर्त्मभिः सुद्गृहीतै-
र्यत्रास्ति प्रेममूर्तेर्नहि महिमसुधा नापि भावस्तदीयः।
किंवा वैकुण्ठलक्ष्म्याप्यहह परमया यत्र मे नास्ति राधा
किं त्वाशाप्यस्तु वृन्दावनभुवि मधुरा कोटिजन्मान्तरेपि।।२१६।।

श्यामश्यामेत्यनुपमरसापूर्णवर्णैर्जपन्ती
स्थित्वास्थित्वा मधुरमधुरोत्तारमुच्चारयन्ती।
मुकतास्थूलान्नयनगलितानश्रुबिन्दून्वहन्ती
हृष्यद्रोमा प्रतिपदि चमत्कुर्वती पातु राधा।।२१७।।

तादृड्मूर्त्तिर्व्रजपतिसुतः पादयोर्मे पतित्वा
दन्ताग्रेणाथ धृत्वा तृणकममलान्काकुवादान्ब्रवीति।
नित्यं चानुव्रजति कुरुते संगमायोद्यमं चे-
त्युदेगं मे प्रणयिनि किमावेदयेयं नु राधे।।२१८।।

चलल्लीलागत्या क्वचिदनुलद्धंसमिथुनं
क्वचित्तृकेकिन्यग्रे कृतनटनचन्द्रक्यननुकृति।
लताश्लिष्टं शाखिप्रवरमनुकुर्वत् क्वचिदहो
विदग्धद्वन्द्वं तद्रमत इह वृन्दावनभुवि।।२१९।।

व्याकोशेन्दीवराष्टापदकमलरूचां हारि कान्त्या स्वया
यत् कालिन्दीयं सुरभिमनिलं शीतलं सेवमानम्।
सान्द्रानन्दं नवनवरसं प्रोल्लसत्केलिवृन्दं
ज्योतिर्द्वन्द्वं मधुरमधुरं प्रेमकन्दं चकास्ति।।२२०।।

कदा मधुरसारिकाः स्वरसपद्यमध्यापय-
त्प्रदाय करतालिकाः क्वचन नर्तयत्केकिनम्।
क्वचित् कनकवल्लरीवृततमाललीलाधनं
विदग्धमिथुनं तदद्भुतमुदेति वृन्दावने।।२२१।।

पत्रालीं ललितां कपोलफलके नेत्राम्बुजे कज्जलं
रंगं बिम्बफलाधरे च कुचयोः काश्मीरजालेपनम्।
श्रीराधे नवसंगमाय तरले पादांगुलीपंक्तिषु
न्यस्यन्ती प्रणयादलक्तकरसं पूर्णा कदा स्यामहम्।।२२२।।

श्रीगोवर्धन एक एव भवता पाणौ प्रयत्नाद्धृतो
राधावर्ष्मणि हेमशैलयुगले दृष्टेपि ते स्याद्भयम्
तद्गोपेन्द्रकुमार मा कृत वृथा गर्व परीहासतः
कर्ह्येवं वृषभानुनन्दिनि तव प्रेयांसमाभाषये।।२२३।।

अनङ्गजयमङ्गलध्वनितकिंकिणीडिण्डिमः
स्तनादिवरताडनैर्नखरदन्तघातैर्युतः।
अहो चतुरनागरीनवकिशोरयोर्मञ्जुले
निकुञ्जनिलयाजिरे रतिरणोत्सवो जृम्भते।।२२४।।

यूनोर्वीक्ष्य दरत्रपानटकलामादीक्षयन्ती दृशो-
र्वृण्वाना चकितेन सञ्चितमहारत्नस्तनं चाप्युरः।
सा काचिद्वृषभानुवेश्मनि सखीमालासु बालावली-
मौलिः खेलति विश्वमोहनमहासारूप्यमाचिन्वती।।२२५।।

ज्योतिः पुञ्जद्वयमिदमहो मण्डलाकारमस्याः
वक्षस्युन्मादयति हृदयं किं फलत्यन्यदग्रे।
भ्रूकोदण्डं नकृतघदनं सत्कटाक्षौघबाणैः
प्राणान्हन्यात्किमु परमतो भावि भूयो न जाने।।२२६।।

भोः श्रीदामन्सुबल वृषभ स्तोक कृष्णार्जुनाद्याः
किं वो दृष्ट मम नु चकिता दृग्गता नैव कुञ्जे।
काचिच्छेवी सकलभुवनाप्लाविलावण्यपूरा
दूरादेवाखिलमहरतप्रेयसो वस्तु सख्युः।।२२७।।

गता दूरे गावो दिनमपि तुरीयांशमभज-
द्वयं दातुं क्लान्तास्तव च जननी वर्त्मनयना।
अकस्मात्तूष्णीके सजलनयने दीनवदने
लुठत्यस्यां भूमौ न्वयि नहि वयं प्राणिणिषवः।।२२८।।

नासाग्रे नवमौक्तिकं सुरूचिरं स्वर्णोज्जवलं बिभ्रती
नानाभंगिरनङ्गरङ्गविलसल्लीलातरङ्गावलिः।
राधे त्वं प्रविलोभय व्रजमणिं रत्नच्छटामजरी
चित्रोदंचितकंचुकस्थगितयोर्वक्षोजयोः शोभया ।।२२९।।

अप्रेक्षे कृतनिश्चयापि सुचिरं वीक्षेत दृक्कोणतो
मौने दार्ढ्यमुपाश्रितापि निगदेत्तामेव याहीत्यहो।
अस्पर्शे सुधृताशयापि करयोर्धृत्वा बहिर्यापये-
दाधाया इति मानदुस्थितिमहं प्रेक्षे हसन्ती कदा।।२३०।।

रसागाधे राधाहृदि सरसि हंसः करतले
लसद्वंशस्रोतस्यमृतगुणसंगः प्रतिपदम्।
चलत्पिच्छोत्तंसः सुरचितवतंसः प्रमदया
स्फुरद्गुञ्जागुच्छः स हि रसिकमौलिर्मिलतु माम्।।२३१।।

अकस्मात्कस्याश्चिन्नववसनमाकर्षति परं
मुरल्या धम्मिल्ले स्पृषति कुरूतेन्याकरधृतिम्।
पतन्निन्त्यं राधापदकमलमूले व्रजपूरे
तदित्थं वीथीषु भ्रमयति स महालम्पदमणिः।।२३२।।

एकस्या रतिचौर एव चकितं चान्यास्तनान्ते करं
कृत्वा कर्षति वेणुनान्यसुदृशो धम्मिल्लमल्लीस्रजम्।
धत्तेन्याभुजवल्लिमुन्पुलकितां संकेतयत्यन्यया
राधायाः पदयोर्लुठत्यलममुं जाने महालम्पटम्।।२३३।।

प्रियांसे निक्षिप्तोत्पुलकभुजदण्डः क्वचिदपि
भ्रमन्वृन्दारण्ये मदकलकरीन्द्राद्भुतगतिः।
निजां व्यञ्जन्नत्यद्भुतसुरतशिक्षां क्वचिदहो
रहः कुंजे गुञ्जाध्वनितमधुपे क्रीडति हरिः।।२३४।।

दूरे सृष्ट्यादिवार्ता न कलयति मनाङ्नारदादीन्स्वभक्ता-
न्छ्रीदामाद्यैः सुहृद्भिर्न मिलेति हरति स्नेहवृद्धिंस्वपित्रोः
किन्तु प्रेमैकसीमां मधुररससुधासिन्धुसारैरगाधां
श्रीराधामेव जानन्मधुपतिरनिषं कुञ्जवीथीमुपास्ते।।२३५।।

सुस्वादुसुरसतुन्दिलमिन्दीवरवृन्दसुन्दरं किमपि।
अधिवृन्दाटवि नन्दति राधावक्षोजभूषणं ज्योतिः।।२३६।।

कान्तिः कापि परोज्जला नवमिलच्छ्रीचन्द्रिकोद्भासिनी
रामाद्यद्भुतवर्णकाञ्चितरुचिर्नित्याधिकाङ्गच्छविः।
लज्जानम्रतनुः स्मयेन मधुरा प्रीणाति केलिच्छटा
सन्मुकताफलचारुहारसुरुचिः स्वात्मार्पणेनाच्युतम्।।२३७।।

यन्नारदाजेशशुकैरगम्यं वृन्दावने वञ्जुलमञ्जुकुञ्जे।
तत्कृष्णचेतोहरणैकविज्ञमत्रास्ति किंचित्परमं रहस्यम्।।२३८।।

लक्ष्म्या यच्च न गोचरीभवति यन्नापुः सखायः प्रभोः
सम्भाव्योपि विरंचिनारदषिवस्वायंभुवाद्यैर्न यः।
यो वृन्दावननागरीपषुपतिस्त्रीभावलभ्यः कथं
राधामाधवयोर्ममास्तु स रहोदास्याधिकारोत्सवः।।२३९।।

उच्छिष्टामृतभुक्तवैव चरिवं श्रृण्वंस्तवैव स्मरन्
पादाम्बोजरजस्तवैव विचरन्कुञ्जान्स्तवैवालयान्।
गायन्दिव्यगुणांस्तवैव रसदे पश्यंस्तवैवाकृतिं
श्रीराधे तनुवाङ्मनोभिरमलैः सोहं तवैवाश्रितः।।२४।।

क्रिडन्मीनद्वयाक्ष्याः स्फुरदधरमणीविद्रुमश्रोणिभार-
द्वीपायामोन्तरालस्मरकलभकटाटोपवक्षोरुहायाः।
गम्भीरावर्त्तनाभेर्बहुलहरिमहाप्रेममीयूषसिन्धोः
श्रीराधायाः पदांबोरुहपरिचरणे योग्यतामेव चिन्वे।।२४१।।

मालाग्रन्थनशिक्षया मृदुमृदुश्रीखण्डनिर्घर्षणा-
देशेनाद्भुतमोदकादिविधिभिः कुञ्जान्तसम्मार्जनैः।
वृन्दारण्यरहःस्थलीषु विवशा प्रेमार्त्तिभारोद्गमात्
प्राणेषं परिचारिकैः खलु कदा दास्या मयाधीश्वरी।।२४२।।

प्रेमाम्भोधिरसोल्लसत्तरुणिमारम्भेण गम्भीरदृग्-
भेदा भङ्गिमृदुस्मितामृतनवज्योत्स्नाञ्चितश्रीमुखी।
श्रीराधा सुखधामनि प्रविलसद्वृन्दाटवीसीमनि
प्रेयोङ्के रतिकौतुकानि कुरूते कन्दर्पलीलानिधिः।।२४३।।

शुद्धप्रेमविलासवैभवनिधिः कैशोरशोभानिधि-
वैदग्धीमधुरांगभंगिमनिधिर्लावण्यसम्पन्निधिः।
श्रीराधा जयतान्महारसनिधिः कन्दर्पलीलानिधिः
सौन्दर्यैकसुधानिधिर्मधुपतेः सर्वस्वभूतो निधिः।।२४४।।

नीलेन्दीवरवृन्दकान्तिलहरीचौरं किशोरद्वयं
त्वय्येतत्कुचयोश्चकास्ति किमिदं रूपेण संमोहनम्।
तन्मामात्मसखीं कुरू द्वितरुणीयं नौ दृढं श्लिष्यति
स्वच्छायामभिवीक्ष्य मुह्यति हरौ राधास्मितं पातु नः।।२४५।।

संगत्यापि महोत्सवेन मधुराकारां हृदि प्रेयसः
स्वच्छायामभिवीक्ष्य कौस्तुभमणौ सम्भूतशोका क्रुधा।
उत्क्षिप्यान्यप्रियपाणिमेव विनयेत्युक्त्वा गताया बहिः
सख्यै सास्त्रनिवेदनानि किमहं श्रोष्यामि ते राधिके।।२४६।।

महामणिवरस्रजं कुसुमसंचयैरंचितं
महामरकतप्रभाप्रथितमोहितष्यामलम्।
महारसहीपतेरिव विचित्रसिद्धासनं
कदा नु तव राधिके कबरभारमालोकये।।२४७।।

मध्येमध्ये कुसुमखचितं रत्नदाम्ना निबद्धं
मल्लीमाल्यैर्घनपरिमलैर्भूशितं लम्बमानैः।
पश्चाद्राजन्मणिवरकृतोदारमाणिक्यगुच्छं
धम्मिल्लं ते हरिकरधृतं कर्हि पष्यामि राधे।।२४८।।

विचित्राभिर्भंगीविततिभिरहो चेतसि परं
चमत्कारं यच्छन्ललितमणिमुक्तादिललितः।
रसावेशाद्वित्तः स्मरमधुरवृत्ताखिलमहो-
द्भुतस्ते सीमन्ते नवकनकनट्टं विजयते।।२४९।।

अहो द्वैधीकर्त्तुं कृतिभिरनुरागामृतरस-
प्रवाहैः सुस्निग्धैः कुटिलरुचिरश्याम उचितः।
इतीयं सीमन्ते नवरुचिरसिन्दूररचिता
सुरेखा नः प्रख्यापयितुमिव राधे विजयते।।२५०।।

चकोरस्ते वक्त्रामृतकिरणबिम्बे मधुकर-
स्तव श्रीपादाब्जे जघनपुलिने खञ्जनवरः।
स्फुरन्मीनो जातस्त्वयि रससरस्या मधुपतेः
सुखाटव्यां राधे त्वयि च हरिणस्तस्य नयनम्।।२५१।।

स्पृष्ट्वास्पृष्ट्वा मृदुकरतलेनांगमंगं सुशीतं
सान्द्रानन्दामृतरसह्रदे मज्जतो माधवस्य।
अंके पंकेरुहसुनयना प्रेममूर्त्तिः स्फुरन्ती
गाढाश्लेषोन्नमितचिबुका चुम्बिता पातु राधा।।२५२।।

सदा गायंगायं मधुरतरराधाप्रिययशः
सदा सान्द्रानन्दा नवरसदराधापतिकथाः।
सदा स्थायंस्थायं नवनिभृतराधारतिवने
सदाध्यायं ध्यायं विवशहृदि राधापदसुधाः।।२५३।।

श्यामश्यामेत्यमृतरससंस्रविवर्णाञ्जपन्ती
प्रेमौत्कण्ठ्यात्क्षणमपि सरोमांचमुच्चैर्लपन्ती।
सर्वत्रोच्चादनमिव गता दुःखदुखेन पारं
कांक्षन्त्यह्नो दिनकरमलं क्रुधयती पातु राधा।।२५४।।

कदाचिद्गायन्ती प्रियरतिकलावैभवगतिं
कदाचिद्ध्यायन्ती प्रियसहभविश्यद्विलसितम्।
अलं मुंचामुंचेन्यतिमधुरमुग्धप्रलपितै-
र्नयन्ती श्रीराधा दिनमिह कदानन्दयतु नः।।२५५।।

श्रीगोविन्द व्रजवरवधूवृन्दचूडामणिस्ते
कोटिप्राणाभ्यधिकपरमप्रेष्ठपादाब्जलक्ष्मीः।
कैंकर्येणाद्भुतनवरसेनैव मां स्वीकारोतु
भूयोभूयः प्रतिमुहुरधिस्वामि सम्प्रार्थयेहम्।।२५६।।

अनेन प्रीता मे दिशतु निजकैंकर्यपदवी
दवीयोदृष्टीनां पदमहह राधा सुखमयी।
निधायैवं चित्ते कुवलयरुचिं बर्हमुकुटं
किशोरं ध्यायामि दुतकनकपीतच्छविनटम्।।२५७।।

ध्यायंस्तं शिखिपिच्छमौलिमनिशं तन्नाम् संकीर्त्तयन्
नित्यं तच्चरणाम्बुजं परिचंरस्तन्मन्त्रवर्य जपन्।
श्रीराधापददास्यमेव परमाभीष्टं हृदा धारयन्
कर्हि स्यां तदनुग्रहेण परमोद्भूतानुरागोत्सवः।।२५८।।

श्रीराधा रसिकेन्द्ररूपगुणवद्गीतानि संश्रावयन्
गुञ्जामञ्जुलहारबर्हमुकुटाद्यावेदयंश्चाग्रतः।
श्यामप्रेषितपूगमाल्यनवगन्धाद्यैश्च सम्प्रीणयं
स्त्वत्पादाब्जनखच्छटारसहृदे मग्ना कदा स्यामहम्।।२५९।।

क्वासौ राधा निगमपदवीदूरगा कुत्र चासौ
कृष्णस्तस्याः कुचकमलयोरन्तरैकान्तवासः।
क्वाहं तुच्छः परममधमः प्राण्यहो गर्हयकर्मा
यत्तन्नाम स्फुरति महिमा एष वृन्दावनस्य।।२६०।।

वृन्दारण्ये नवरसकलाकोमलप्रेममूर्त्तेः
श्रीराधायाश्चरणकमलामोदमाधुर्य्यसीमा।
राधां ध्यायन्नसिकतिलकेनात्तकेलीविलासां
तामेवाहं कथमिह तनुं न्यस्य दासी भवेयम्।।२६१।।

हा कालिन्दि त्वयि मम निधि प्रेयसा क्षालितो भू-
द्भोभो दिव्याद्भुततरुलतास्त्वत्करस्पर्शभाजः।
हे राधाया रतिगृहशुका हे मृगा हे मयूराः
भूयोभूयः प्रणतिभिरहं प्रार्थये वोनुकम्पाम् ।।२६२।।

वहन्ती राधायाः कुचकलशकाश्मीरजमहो
जलक्रीडावेशाद्गलितमतुलप्रेमरसदम्।
इयं सा कालिन्दी विकसितनवेन्दीवररुचि-
स्सदा मन्दीभूतं हृदयमिह सन्दीपयतु मे।।२६३।।

सद्योगीन्द्रसुदृश्यसान्द्ररसदानन्दैकसन्मूर्त्तयः
सर्वेप्यद्भुतसन्महिम्नि मधुरे वृन्दावने संगताः।
ये क्रूर अपि पामिनो न च सतां सम्भाष्य दृश्याश्चये
सर्वान्वस्तुतया निरीक्ष्य परमस्वाराध्यबुद्धिर्मम।।२६४।।

यद्राधापदकिंकरीकृतहृदां सम्यग्भवेद्गोचरं
ध्येयं नैव कदापि यद्हृदि विना तस्याः कृपास्पर्शतः।
यत्प्रेमामृत सिन्धुसाररसदं पापैकभाजामपि
तद्वृन्दावनदुष्प्रवेशमहिमाश्चर्यं हृदि स्फूर्जतु।।२६५।।

राधाकेलिकलासु सक्षिणि कदा वृन्दावने पावने
वत्स्यामि स्फुटमुज्ज्वलाद्भुतरसे प्रेमैकमत्ताकृतिः।
तेजोरूपनिकुञ्ज एव कलयन्नेत्रादिपिण्डस्थितं
तादृक्स्वोचितदिव्यकोमलवपुः स्वीयं समालोकये।।२६६।।

यत्रयत्र मम जन्म कर्म्मभिर्नरकेथ परमे पदेथ वा।
राधिकारतिनिकुञ्जमण्डली तत्र तत्र हृदि मे विराजताम्।।२६७।।

क्वाहं मूढमतिः क्व नाम परमानन्दैकसारं रसः
श्रीराधाचरणानुभावकथया निस्यंदमाना गिरः।
लग्नाः कोमलकुञ्जपुञ्जविलसद्वृन्दादवीमण्डले
क्रीडच्छ्रीवृषभानुजापदनखज्योतिश्छटाः प्रायशः।।२६८।।

श्रीराधे श्रुतिभिर्बुधै र्भगवताप्यामृग्य सद्वैभवे
स्वस्तोत्रे स्वकृपात एव सहजो योग्योन्यहं कारितः।
पद्येनैव सदानराधिनि महन्मार्ग विरुध्य त्वदे-
काशे स्नेहजलाकु लाक्षि किमपि प्रीतिं प्रसादीकुरू।।२६९।।

अद्भुतानन्दलोभश्चेन्नाम्ना रससुधानिधिः।
स्तवोयं कर्णकलशैर्गृहीत्वा पीयतां बुधाः।।२७०।।